## वाचक सकलचन्द्रगणिनिर्मितं

# श्रीपार्श्वनाथ-स्तवनम् ।।

## (अजितशान्तिच्छन्दोरीत्या)

- शी.

उपाध्याय श्रीसकलचन्द्रगणि ए १६मा-१७मा शतकना एक विलक्षण विद्वान्, कवि-सर्जक अने त्यागतपोमूर्ति साधु छे. तेमनी प्राकृत, संस्कृत अने गुजराती भाषानी अनेक रचनाओ उपलब्ध छे, प्रसिद्ध पण. 'अनुसन्धान'ना अंकोमां पण तेमनी विविध रचनाओ प्रकाशित थई छे. तेमनी एक नवतर अने विशिष्ट एवी काव्यरचना अत्रे प्रगट थाय छे.

जैनोमां व्यापकपणे गवाता अजित-शान्तिस्तोत्रनी रीतिए, परन्तु ३० ज गाथा (श्लोक) प्रमाण अने विचित्र छन्दोमां रचाएल आ स्तोत्रनो विषय श्रीपार्श्वनाथप्रभुनी स्तवना छे. नीवडेल कविने ज सुलभ पदावली, रचनाप्रौढि, प्रसाद-मधुर अने समास-प्रचुर छतां सरल शैली, आ बधुं प्रथम नजरेज सहृदयोने आकर्षे छे. सामान्यतः 'अजितशान्ति'नी अनुकृति प्राकृतमां ज थती रही छे. अहीं कर्ताए संस्कृतमां रचवानुं पसंद कर्युं छे. छन्दो सामान्यतः अजितशान्तिना ज लागे, परन्तु तेमां पण कवि-प्रतिभाना चमकारा जडे ज छे. दा.त. पांचमो श्लोक, तेमां बे छन्दोनो संयुक्त प्रयोग छे; उपजातिनो नवलो प्रकार ! तो १५मा तथा २१मा पद्योमां 'घटितगद्यविशेषक' एवा नामथी विलक्षण छन्द-प्रयोग कविए कर्यो छे. बे-एक ठेकाणे तूटेल पाठांशने बाद करतां रचना सम्पूर्ण छे. ३०मा पद्यमां कविए पोतानुं नाम तेमज पोताना गुरु 'विजयदानसूरि'नुं नाम पण दर्शाव्युं छे.

प्रान्ते पुष्पिका छे, तदनुसार सं. १८२४मां दानसौभाग्य नामना मुनिवरे आ स्तोत्रनी प्रत लखी छे. वर्षो पूर्वे आनी नकल करावी राखी हती, पण तेनुं मूळ पानुं हवे उपलब्ध नथी, तेथी ते कया भण्डारनी प्रति होय ते नोंधवानुं शक्य नथी.

सिद्धं हृदयनिरुद्धं बुद्धध्यानैर्लताभिरिव वृक्षम् ।
अतिशयमहिमाकक्षं वन्दे वामेयसुरवृक्षम् ॥१॥ आर्या ॥
जिनमिह नतसमयक्षं भवप्रतिपक्षं च सर्वगुणलक्षम् ।
केवलरमाकटाक्षं कुरु पक्षे दक्ष ! भवसमरे ॥२॥ आर्या ॥
सम्मतिसंयतिसन्ततिसन्नतिदुर्गतिहं, शोचनमोचन ! केवललोचन ! दर्शनदम् ।
त्वां हृदि शुद्धरसेन्द्रमिव प्रविधाय जिनं नागमलं प्रदहन्ति बुधा निजकर्ममलम्
॥३॥ सोपानकम् ॥

कल्याणाम्बुधरो महोदयकरो रोगार्त्तिगर्त्ताहरो,
मोहोच्छेदकरो जरामरहरो विश्वाप्तकीर्त्तीश्वरः ।
भग्नानङ्गशरो हताहिपगरो विध्वस्तजन्मादरो,
ब्रह्माण्डैकदिवाकरो भवतु मे मित्रं प्रभो ! ते गुणः ॥४॥ काव्यम् ॥
सकलमुनिजनप्रमोदकं कमठदग्धहरिप्रतिबोधकम् ।
निखिलभवतमोविरोचनं नम जिनं जगतीत्रयलोचनम् ॥५॥
मागधिका-द्रुतविलम्बितछन्दसी ॥

करुणाकरणादरणार्णवलोलतरङ्गतरं
तरुणीरमणीशरणीकृतमन्मथमर्महरम् ।
अधरीकृतदेवनदीसुतरीशुचिगि(गी?)र्विभवं
सदये हृदये ह्युदये तरणेर्नम पारगतम् ॥६॥ आलिङ्गनकम् ॥
विश्वेन्दीवरभाश्व(स्व)ते जिनपते ! त्रैलोक्यवाचस्पते !
शुद्धो(द्धा)चारवते प्रबुद्धमरुते सर्वत्र शोभावते ।
दुष्कर्माद्रिशते युगान्तमरुते निर्लेपतां कुर्वते,
ब्रह्मज्ञानवते नमो भगवते वामेय ! तुभ्यं यते ! ॥७॥ काव्यम् ॥
निचितदुरिततिमिरनिकररविविलसितं,
सकलसुकृतकुमुदविपिनविधुसमुदितम् ।
अरिहरिकरिसमरसमदरगहनदहनगतिं,
जिन ! तव गुण - - - - - ॥८॥
भन्दकन्द ! कन्दनन्द ! पुण्यकुन्दवृन्दचन्द्र ! मन्दबलह !,
दुष्कृतान्त ! निष्कृतान्त ! सत्कृतान्त ! विप्रशान्तजनन ! ।

वान्तसर्वधातुजातविश्वजन्तुघातपात ! जिनप !,
शान्त ! दान्त ! सिद्धिकान्त ! पूतनीलदेहकान्त ! भूनितान्तसुकृतशान्तिदस्त्वम्
॥९॥ नाराचकः ॥
जिनमखिलगुणाकरावतारं दलितसमस्तमदेन्द्रियार्थवारम् ।
प्रशमरसतरङ्गनेत्रतारं भजत भवाब्धिमग्नलोकतारम् ॥१०॥ कुसुमलता ॥
वज्री स्वर्गिषु मानवेषु च यथा चक्री च तेजस्विनां,
मार्त्तण्डः कनकाचलो गिरिषु वा वृक्षेषु कल्पद्रुमः ।
गङ्गा सर्वनदीषु वा हिमरुचिस्तारासु मुख्यस्तथा,
सद्ध्यानेषु तव स्वरूपसुलयो नेतो ! मया ध्यायते ॥११॥ काव्यम् ॥
सदरीबदरीचमरीभ्रमरीशबरीखचरी-
सुसुरीवनरीतिपुरीमधुरीकृतगीतगुणम् ।
अमरीकबरीचमरीकृतचीरसमीरगतं
स(श)फरीलहरीनगरीमिव शीलय जीव ! जिनम् ॥१२॥ आलिङ्गनम् ॥
सुरनरसुखसम्पदामगारं विपुलमतिपतिरमोरुकण्ठहारम् ।
कमठहठकुष्टताकुठारं स्मर पुरुषोत्तममङ्गनाविकारम् ॥१३॥ कुसुमलता ॥
हेमकुचकुम्भिनी विविधसुरमानिनी कुसुमवरदामिनी वदति गीतं,
भुवनपतिकामिनी मरुजवरवादिनी नागसीमन्तिनी वहति तालम् ।
कलितकटिमेखला श्रवणवरकुण्डला नक्रमुक्ताफला सृजति नृत्यं,
चन्द्रमण्डलमुखी हंसगतिगामिनी कापि लीलावती धरती तन्ती ॥१४॥
रचितकटिकिङ्किणी खचिततनुकञ्चुका तिलकमुखशोभिनी वाति तूरं,
हारकेयूरके स्तनितपदनूप(पु)रा ललितसुललन्तिका काऽपि वीणाम् ।
अहिपपद्मावती ताण्डवं तन्वतीतीन ! ते किं मनो हरति नैव,
रोचते तन्न किं मोदसे तेन नो वेति तर्कोऽस्ति नीराग आमे ॥१५॥
घटितगद्ययुग्मम् ॥
निर्विद्यागुरुविद्वते गुणवते निर्ग्रन्थताराजते,
ध्येयानां महते सुखं विदधते सौभाग्यतः स्फूर्जते ।
शुक्लध्यानवते शमं च वहते योगस्य निद्रावते,
निद्रायां स्फुरतीव योगिमनसो मे ते नमोऽर्हन् सते ॥१६॥ काव्यम् ॥

वासवमौलिवृन्दविनते कृतसमविरते, वीतसमस्तदोषकुगत जिन विशदयते ।
धौतशरीर कुन्दसुरभे कलभगते, चेतसि मे हि मर्म रमते तव सुगुणतते ॥१७॥
क्षिज्जितम् ॥

सिद्ध बुद्ध रागरोषपापपोषमानदोषजनन
भावयुद्धसुप्रसिद्धदुर्निवारवीरमारविजय ।
सर्वऋद्धिसिद्धिवृद्धि शुद्धलब्धिदानवचसं
निरुद्धमोहमल्ल वीतराग देहि मे हि ते स्वरूपकलनमीश ! हे ॥१८॥
नाराचकः ॥

बहुलमधुमासके वरचतुर्थीदिने प्राणतस्वर्गत(तो)
योऽश्वसेनाधिपस्त्रीसुवामाङ्गजः शिवपुरीतिलकसमभुजगचिह्नः ।
पोषमासे जिनो बहुलदशमीदिने जननकल्याणको मरकताभो
वरंविशाखाभतुलराशिनवकरतनुस्त्रिंशदब्दो गृहे भुक्तराज्यः ॥१९॥
पोषमासे व्रती बहुलतैकादशी त्रिशतनरवरयुतोऽष्टमतपस्वी
कोपकटधनगृहे परमान्नपारणश्छद्मनाशीतिदिने विहारी ।
सुपिकमधुमासके सितचतुर्थीदिने धातकीद्रुमतले षष्ठतमपसा
सर्ववेदी जिनो विश्वमङ्गलकरो वेदबीजं ददौ दशगणिभ्यः ॥२०॥
पार्श्वपद्मावतीसेविताशासनः सहस्त्रषोडशमुनिव्रातबोधी ।
सोऽष्टत्रिंशत्सहस्त्रार्यिकानायकः सप्तदशकाब्दपर्यायधारी ।
श्रावणाष्टमीदिने वर्षशतजीवितोपोषितो मासि सम्मेतशैले
वरत्रयस्त्रिंशदनगारसमसिद्धिगो भुवनहरिचन्दनो वो मुदेऽस्तु ॥२१॥
घटितगद्यविशेषकम् ॥

नमत नमत जिनपण्डितं क्लेशनाशभुवि मण्डितम् ।
जन्मसागरतरण्डितं त्रिगुणरत्नसुकरण्डितम् ॥२२॥ सुमुखम् ॥

अरतिरतिविमुक्त बोधार्क निर्माय निर्लोभ निष्काम निर्मान निष्क्रोध निःशोक निर्निद्रता,
सकलविगतपाप निःसङ्ग निष्कर्म निर्दम्भ नीराग निर्वेद नीरोग निर्ग्रन्थता ते सदा ।
त्रिभुवनगतवस्तुजातावबोधाग्रलक्ष्मीलसद् ---स्त्वं च निर्दोष निर्मोह निष्प्रेमता,

शमजलगतं मनो निर्गमायावकाशं न लातीति सञ्चित्य सञ्चित्यमेते गुणाब्धिप्रभो !
॥२३॥ दण्डकः ॥

सर्वसुरेन्द्रा विश्वनरेन्द्राः स्नापनचन्द्राश्चोज्झिततन्द्रा
मङ्गलबुधगुरुशुक्रशनैश्चरराहुककेतुकखेटकवृन्दाः ।
सोमयमासुरवैश्रवणामरवारणलोकपकिन्नरभूताः
पार्श्वजिनाधिपकीर्त्तनसंस्तवशान्तिकरा जगतां तु भवन्तु ॥२४॥ रत्नमाला ॥
अमतितिमिरवर्जितं, ज्ञानमास्तनसुमर्दितम् ।
भारतीवदनचुम्बितं, स्मर जिनं जगदर्चितम् ॥२५॥ सुमुखम् ॥
निर्दोषध्वनिगर्जते विलसते मुक्त्या तमो भास्वते
सम्मोहं हरतेऽर्हते विकसते ते प्रातिहार्यश्रिया ।
सच्चित्ते भ्रमते पयोजसरते ध्यानाम्बुदोद्विद्युते
श्रीवामेय ! नमो नमो मम विभो ! ज्ञानाम्बुधौ मज्जते ॥२६॥
हरिहरिचलचित्तगुप्तिगुप्तं, हरिहरिदङ्गमयूषराजमानम् ।
कमठहरिहरिं हरिप्रियादं, हरिहरिणातपवारणत्रयाप्तम् ॥२७॥
हरिहरिपरिचर्ययोपयुक्तं, नरवरिहरिसुदीप्रलोकलेखम् ।
हरिहरिभयभीतिं च पार्श्वं, हरिहरिचन्दनसोदरं नमामि ॥२८॥ काव्ययुग्मम् ॥
नीतिनदीनसुमीनमहीनकिरीट-पीनविलीनसुगन्धविविधकुसुमार्चितपादपङ्कजम् ।
दीनदयालुमुनीनमहीनमनोहरचरितमणिं लीन मुने ! जिनमुपचर सुर इव
सुरतरुमङ्ग ॥२९॥ चित्राक्षरा ॥
इति मुदित**सकलचन्द्र**-स्तुतमिति पार्श्वं च जिनचन्द्र ।
**गुरुविजयदान**भद्रं शान्तिकरं सर्वदा लोके ॥३०॥

इति श्रीअजितशान्तिस्तवनच्छन्दोरीत्या श्रीपार्श्वनाथस्तवनं सम्पूर्णम् ।
विहितं श्री**सकलचन्द्रवाचकचरणै**रिति मङ्गलम् । संवत् १८२४ना वर्षे
आषाढ शुदि १४ शुक्रे मुनिदानसौभाग्य लपीकृतम् ॥